No. ४४८६

Title त्रैलोक्य मोहनं कवचम्.

Author ✓

Extent ६ Age ✗

Subject तन्त्रम्

त्रैलोक्यमोहनकवचम्

रुद्रयामले

४४९७

४४९७

F. 26

॥श्री

[illegible]

त्रै॰क॰ ॥ॐ श्रीगणेशाय नमः॥ श्रीपरदेवतायै नमः॥ देव्युवाच॥ महात्रिपुरसुंदर्यायायाविद्यास्त्वयो
१ दिताः॥ कृपयाकथिताः सर्वाश्रुताश्चाधिगतामया॥१॥ प्राणनाथाधुनाब्रूहिकवचंमंत्रविग्र
हं॥ त्रैलोक्यमोहनंचेतिकवचंमंत्रविग्रहं॥२॥ इदानींश्रोतुमिच्छामिसर्वार्थंकवचंस्फुटं॥
॥ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिसुंदरिप्राणवल्लभे॥३॥ त्रैलोक्यमोहनंनामस
विष्णु र्वविद्यौघविग्रहं॥ यत्प्रसादानवान्नैनिजघानमुरुमुर्मुरुः॥४॥ सृष्टिंवितनुतेब्रह्मायत्स्थ
हं त्वाफठनाद्यतः॥ संहर्तायंयतोदेवीदेवेशोवासवोयतः॥५॥ धनाधिपः कुबेरोपियतः स
र्वेदिगीश्वराः॥ नदेयंपराशिष्येभ्योदेयंशिष्येभ्यएवच॥६॥ अभक्तेभ्योपिपुत्रेभ्योदत्वा हेरंब
मृत्युमवाप्नुयात्॥ श्रीमत्त्रिपुरसुंदर्याः कवचस्यऋषिः शिवः॥७॥ छंदोविराड्देवताचश्रीम १
त्रिपुरसुंदरी॥ धर्मार्थकाममोक्षेषुविनियोगः प्रकीर्तितः॥८॥ शिरोमेवाग्भवंपातुकएईलह्रीं

रूपकं॥हसकलह्रीं ललाटंतु पातु कामेश्वरादिमं॥९॥हकहलह्रीं दृशौ च पातु कामेशमध्य
मं॥१०॥कहयलह्रीं श्रुतीतु पातु कामं तत्तीयकं॥ हकलसह्रीं शक्त्याख्यं पातु जिह्वां च पंचमं॥
॥११॥कएईलह्रीं हसकलह्रीं हकहलह्रीं कहयलह्रीं हकलसह्रीं परमात्मरूपिणी॥वदनं
सकलं पातु पंचकूटैस्तु पंचमी॥१२॥कएईलह्रीं घ्राणं तु पातु वाभवसंज्ञिकं॥हसकहल
ह्रींकंठं तु पातु कामेशसंज्ञकं॥१३॥सकलह्रीं शक्तिकूटं स्कंधौ पातु सदा मम।कएईलह्रीं
हसकहलह्रीं सकलह्रीं च॥१४॥कामेनोपासिता विद्या कक्षद्वेशं सदावतु॥क्लीं ह्रीं श्रीं
ऐंसौः ॐ ह्रीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं ऐं ह्रीं॥१५॥कामादिषोडशी पातु भुजौ त्रिपुरसुंदरी॥

क्षी

त्रै०क० ओं क्लीं ह्रीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं स्त्रीं ऐं क्रों श्रीं हूं ॥१६॥ तारादि षोडशी पातु मणिबंधद्व

२ यं तथा॥ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं ऐं क्लीं सौः। सौः ऐं क्लीं ह्रीं श्रीं ॥१७॥ रमादि षोडशी पातु क

रौ त्रिपुरसुंदरी ॥ मायादिका तु ह स्पातु श्रीमत्रिपुरसुंदरी ॥१८॥ ह्रीं ह्सौं ओं ऐं ह्रीं श्रीं ऐं क्लीं

सौः॥ स्त्रीं क्रों ऐं ह्रीं हूं हूं श्रीं॥ मायादि षोडशी व्याप्ता हृदयं परिरक्षतु॥१९॥ ऐं ह्रीं श्रीं क्लीं तु १

२ सौः ऐं क्लीं सौः ऐं क्लीं सौः ऐं ह्रीं श्रीं क्लीं सौः॥ वाग्गादि षोडशी पातु स्तनौ मे सुंदरी परा॥२०॥

कएश्रीहसकल ह्रीं क्लीं हसकहल ह्रीं सौः॥ सकहीनखव र्षा पार्श्वौ पातु पराजिता ॥२१॥ हेरंब

ह्रीं ह्सौं स्हौं ह्रीं स्हौं ह्सौं क्लीं हसकहल ह्रीं ह्रीं ह्रीं सौः सौः हहसकहल ह्रीं क्लीं ह्सौं स्हौं ह्रीं २

स्हौंह्स्रौंह्रींमे॥२२॥एकत्रिंशद्वर्णरूपामहापुरुषपूजिता॥महागुहास्वरूपाचकेवला
नंदचिन्मयी॥२३॥कटिदेशंसदापातुपरब्रह्मस्वरूपिणी॥हसकहलह्रींपातुमेपृष्ठंह
सकहलह्रीं॥२४॥कुक्षिंपातुकामराजसकलह्रींसदावतु।वक्षस्थलंशक्तिकूटंसर्व
संपत्तिदायकं॥२५॥हसकलह्रींहसकहलह्रींसकलह्रींमे।लोपामुद्रापंचदशीमध्येदेशं
॥२६॥ सदावतु॥कहएईलह्रींनाभिंपातुहकएईलह्रीं।कटिंपातुसक्थिनीचसकएईलह्रींसदा॥२७॥
कहएईलह्रींहकएईलह्रींसकएईं॥लह्रींवसुचंद्राएंमांमानवीसर्वतोवतु॥२८॥सहकए
ईलह्रींतदूरूयुग्मंसदावतु॥सहकहएईलह्रींगुल्फंपातुसदामम॥२९॥हसकएईलह्रींतुजा
नुनीपातुमेसदा॥सहकएईलह्रींसहकहएईलह्रींह॥३०॥सकएईलह्रींचंद्रविद्यापक्षाक्षि

त्रै॰ क॰ वर्णिका ॥ जलजेभयसंघातेसदामांपरिरक्षतु ॥ ३१ ॥ हसकएईल्लह्रींसागुरुकूयुग्मसदा
३ वतु ॥ हसकहएईलह्रींपादौपातुचमेसदा ॥ ३२ ॥ सहकएईलह्रींमेप्रपदेपातुसर्वदा ॥ हस
कएईल्लह्रींहसकहएईलह्रींस ॥ ३३ ॥ हकएईलह्रींसदाकुबेरेणप्रपूजिता ॥ द्वाविंशत्य
क्षराविद्यासर्वांगंमेसदावतु ॥ ३४ ॥ कएईलह्रींप्राच्यांतुत्रिपुरापरिरक्षतु ॥ हसकहल
3 ह्रींपातुवन्हिकोणेनिरंतरं ॥ ३५ ॥ सहसकलह्रींयाम्यांपातुमांसर्वसिद्धिदं ॥ कएईल
ह्रींहसकहलह्रींसहसकल्लं ॥ ३६ ॥ ह्रींतुविद्यागस्तिसेव्याचक्रस्थामांसदावतु ॥ सएई
लह्रींनित्यंचनैरृत्यांमांसदावतु ॥ ३७ ॥ सहकहलह्रींपातुप्रतीच्यांतुद्वितीयकं ॥ सकलह्रीं हेरंब
तुवायव्येसदामांपरिरक्षतु ॥ ३८ ॥ सएईलह्रींसुहकहलह्रींसकलह्रींतु ॥ नंद्याराधितविद्ये ३

अ ल

यंसर्वांगेमेसदावतु॥ ३९॥ हसकहह्रीमुत्तरे पातुमांगदीश्वरी। सहकौंह्रीमीशान्यां शिवपत्नी
चपातुमां॥ ४०॥ सकहलह्रींसुंदरी ऊर्ध्वेमांपातुसर्वदा। हसकलह्रीं सहकलह्रीं सकहलह्रीं
मां॥ ४१॥ अधोरक्षतुसानित्यंसूर्यपूज्यामयोदया॥ कएईलह्रींहसकहलह्रींसकलह्रींमे
॥ ४२॥ सर्वांगंरक्षतुसंपूज्यासततंपरिरक्षतु॥ कएईलह्रींहकहलह्रींहसकलह्रींच॥ ४३॥
ब्रह्माणीमांसदापायाश्रीमत्रिपुरसुंदरी॥ हसकलह्रींहसकहलह्रींसकलह्रींह॥ ४४॥ सक
लहसकहलसकलह्रींचशांकरी॥ चतुष्कूटामहाविद्यापातालेमांसदावतु॥ ४५॥ हसक
लह्रींमाधारंहसकहलह्रींशिवं॥ सकलह्रींपातुनाभिंसहकलह्रीमनाहतं॥ ४६॥ सहकह
लह्रींकंठंसहसकलह्रींतथा॥ मनोभुवंसदापातुरससंख्यमहाप्रभं॥ ४७॥ हसकलह्रींहस
कहलह्रींसकलह्रींस॥ हकलह्रींसहकहलह्रींसहसकलह्रीं॥ ४८॥ षट्कूटावैछडवीसावे

त्रै० क० पातुमांसुंदरीपरा॥कएईलह्रींहसकहलह्रींसकल॥४९॥ह्रींदुर्वाससापूज्यादिक्षुविद्या
४ सदावतु॥कहएईलह्रींहलएईलह्रींसकएई॥५०॥लह्रींक्रोधेनसंपूज्यामांविदिक्षुचरक्ष
तु॥हसकलह्रींहसकहहलह्रींसकलह्रीं॥५१॥महाज्ञानमयीपातुनित्यंमांषोडश्रीपरा
क ॥श्रींह्रींक्लींऐंसौः ॐह्रींश्रींकएईलह्रींहसौ॥५२॥हलह्रींसकलह्रींसौःऐंक्लींह्रींश्रींसदा
५ वतु॥सर्वांगमेमहाविद्याबीजरूपाचषोडशी॥५३॥ओंक्लींह्रींश्रींऐंक्लींसौःकएईलह्रींहसक
हलह्रींसकलह्रींस्त्रीऐंक्रोंक्रींईंहूंतथापुनः॥५४॥श्रीमहाषोडशीपूर्णाप्रथितामुवनत्रये
॥ज्ञानेनमृत्युरामनीमांशिरस्थासदावतु॥५५॥श्रीमहाषोडशीपूर्णायादेव्याचप्रपूजि
ता॥यस्याविज्ञानमात्रेणमृत्योर्मृत्युर्भवेत्स्वयं॥५६॥ऐंकएईलह्रींक्लींहसकहलह्रींसौःस हेरंब
४

क॥ ल्ह्रींसोहंह्रौंहं सः ह्रींसकल ह्रींसौः ह सक॥ ५७॥ हल ह्रीं क्लीं कएईल ह्रीं ऐं ब्रह्मस्वरूपिणी॥
नेत्रवेदयुतैर्वर्णैर्युतामां सर्वतोवतु॥ ५८॥ ब्रह्मस्वरूपिणी चेयं परमानंद चिद्द्‌घना॥ अष्टादशा
क्षरी विद्या सदा मां परिरक्षतु॥ ५९॥ इति ते कथितं देवि ब्रह्मविद्याकलेवरं॥ त्रैलोक्यमोहनंना
मक कवचं ब्रह्मरूपकं॥ ६०॥ सप्तलक्षमहाविद्यास्तस्मादौ कथिता प्रिये॥ तासां सारात्सारत
रायाया विद्याः सुपोपिता॥ ६१॥ बहुनात्र किमुक्तेन श्रीमहाषोडशीपरा॥ प्रकाशिता महादेवी
यां पृच्छसि पुनः पुनः॥ ६२॥ महाविद्यामयं ब्रह्मकवचं मन्मुखोदितं॥ गुरुमभ्यर्च्य विधिवत्पुर
श्चर्यां समाचरेत्॥ ६३॥ अष्टोत्तरशतं जप्त्वा दशांशं हवनादिकं॥ ततस्तु सिद्धकवचः पुण्यात्मा
मदनोपमः॥ ६४॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्यां विना ततः॥ गद्यपद्यमयी वाणी तस्य वक्त्रात्प्रजायते॥

त्रै०कृ०॥ ६५॥ वल्के तस्य वसेद्वाणी कमला निश्चला गृहे। पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् ॥ ६६॥
५ अपि वर्षसहस्राणां पूजाफलमवाप्नुयात् ॥ आत्मानं तन्मयं कृत्वा यः पठेत् कवचं परं ॥ ६७॥ यंयं
पश्यति चेच्छीघ्रं स सदा सो भवेध्रुवं ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ ६८॥ कंठे वा दक्षि
णे बाहौ स कुर्याद्दासवज्जगत् ॥ त्रिलोकीं क्षोभयेत्येव त्रैलोक्यविजयी भवेत् ॥ ६९॥ तद्गात्रं प्राप्य
शस्त्राणि ब्रह्मास्त्रादीनि पार्वति॥ माल्यानि कुसुमानीव सुखदानि भवंति हि॥ ७०॥ स्पर्धां निर्धू
य भवने लक्ष्मीर्वाणी वसेत्ततः॥ इदं कवचमज्ञात्वा यो जपेत्सुंदरीं परां॥ ७१॥ न वलक्षं प्रजप्त्वा
पि तस्य विद्या न सिध्यति॥ शस्त्रघातमवाप्नोति सोचिरान्मृत्युमाप्नुयात् ॥ ७२॥ इदमेव परं य हेरंबू
स्मात् भुक्तिमुक्तिप्रदायकं॥ तस्मात्सर्वप्रयत्नेन पठनीयं मुमुक्षुभिः॥ ७३॥ भूर्वेरमगत्रिवृत्तषो ४

त्रै० क० डशानागशाक्षदि॥ युग्मवस्वनला कोणबिंदुमध्ये॥ सिंहासनोपरिगतारकपीठमध्ये प्रोत्फु
५ ल्लपद्मनयनां त्रिपुरां भजेहं॥ ७४॥ इति श्रीरुद्रमत्ले त्रैलोक्यमोहनकवचं संपूर्णं॥ ॥श्री॥

॥ श्रीपरदेवतार्पणमस्तु॥

6

हेरंबू
५

त्रैलोक्यमोहनकवचं

८०